श्रीः

तत्त्वसारः

श्रीवत्सकुलतिलकैः श्रीमद्वरदाचार्यैः

समनुगृहीतः

पूर्वोत्तरमीमांसाभूषणेन विद्यानिधिना

देवशिखामणि रामानुजाचार्येण

संशोधितः

उभयवेदान्तप्रवर्तनसभया

मुद्रापितः

१९३२

Sree Panchacharya Electric Press, Mysore.

तत्त्वसारस्य भूमिका.

अस्य ग्रंथरत्नस्य निर्माता—श्रीवत्सकुलतिलकायमानो वरदराजसूरिः. सोऽयं भगवतः श्रीभाष्यकारस्य पूर्वाश्रमकनिष्ठभगिन्याः कमलानाम्न्याः पत्युः श्रीवत्सवंश्यस्य महाकारुणिकनाम्नः विबुधवरेण्यस्य प्रपौत्रः; वादाहवविजित दुर्वादिसंघस्य, अतएव मातुलेन भाष्यकारेण "अस्माकं प्रियस्वस्रीयः" इति करुणाकटाक्षविशेषैरनुगृहीतस्य, श्री भाष्यकारशिष्यमण्डल्यन्तर्गतस्य वरदविष्णवार्यनाम्नो भाष्य कारभागिनेयस्य पौत्रः; वादचातुरीपराजितपरवादिवितीर्ण जयपत्रस्य देवराजविपश्चितः पुत्रः; भाष्यकारनिर्याणसमयात् किंचिदनन्तरकाले सत्यव्रतक्षेत्रान्तर्गततुण्डीरमंडलान्तर्वर्तिन्यां कांच्यां कृतावतरणः.

अमुं च श्रीवैकुण्ठनिकेतनविष्वक्सेनपारिषदेष्वन्यतमस्य सुभद्रस्य अवतारविशेषं कारणविशेषैः कथयन्ति वृद्धाः. अयं च श्रीभाष्यकारशिष्यमण्डल्यां "एंगळाळ्वान्" इति द्राविडनाम्ना प्रख्यातविभवस्य श्रीविष्णुपुराणव्याख्यानाद्यनेकप्रबंधनिर्मातुः श्रीविष्णुचित्तार्यस्य शिष्य इतीममंशं तत्त्वसारग्रंथस्यादिमपद्येन स्वयमेव प्रकटयति. तथा—"नडादूर् आळ्वान्" इति द्राविडनाम्ना सुप्रसिद्धस्य, श्रीभाष्यकार

शिष्यतां गतस्य, पूर्वनिर्दिष्टस्य, भाष्यकारभागिनेयस्य पौत्र
मप्यात्मनः ग्रन्थान्तिमपद्ये स्वयमेव आवेदयति.

अनेन च वेदबाह्यमतांतरनिराकरणपूर्वकं विशिष्टाद्वै
सिद्धांतस्थापनपराः बहवः प्रबन्धा निर्मिताः. तेषु चास्मा
रवगतास्त्वेते—१ द्रमिडोपनिषत्संग्रहः, २ श्रीभाष्यसंग्रह
३ परतत्त्वनिर्णयः, ४ चतुर्लक्षणसंग्रहः, ५ रहस्यसंग्रह
६ हेतिराजस्तवः, ७ ज्ञानसारः, ८ जयन्तीदर्पणः, ९ मंगल
शासनम्, १० प्रमेयसारः, ११ प्रमेयमाला, १२ आराधनक्रम
१३ आन्हिकचूडामणिः, १४ प्रपन्नपारिजातः, १५ तत्त्वस
श्चेति. एवमन्येऽपि केचन स्तोत्रग्रंथा एतत्प्रणीताः स
ल्लसंति.

अस्य च गुरुवर्यस्य बहुमुखं वैभवविशेषं पुराविदः क
यंति. तदेतत्सर्वं यथावसरं समयांतरे प्रकाशयिष्याम
संक्षेपतस्तु—कदाचित् वपापरिमलोल्लासवासिताधरपल्लव
श्रियःपतेर्भगवतो देवराजस्य निवेदनार्थं नीयमानस्य क्षी
स्यात्युष्णतां भगवतस्सौकुमार्यातिशयं चानुसंदधानः तस्मि
क्षीरे सुखोष्णतां संपाद्य भगवते निवेदयामास. तत
संतुष्टान्तरंगेण भगवता पुत्रे मातुरिव स्वस्मिन्नस्य नि
वधिकं वात्सल्यमालोच्य "सोऽयं मज्जननीपदमारोढुमर्ह
इति स्वाभिप्रायमाविश्चिकीर्षुणा "एन्नम्माळ्" इति द्रावि
नामधेयरूपा "मज्जननी" इत्यर्थाभिधायिका समाख्या अ
सबहुमानं समर्पितेति समुद्घोषयंति वृद्धाः. यथा—

पुत्रिणे चिदचित्पित्रा पौत्रिणे परमेष्ठिना ।
स्नुषावते जगन्मात्रा वात्स्याय गुरवे नमः ॥

क्षीरं येन समर्पितं मधुरिमस्फारं निपीयादरात्
धीरं मज्जननीत्यगर्जि करुणासारं मुहुर्वर्षता ।
श्रीरंत्रा करिशैलशृंगमयतोदारं महांभोमुचा
नीरंध्रं सुखमातनोतु वचसां दूरं स वात्स्यो गुरुः ॥ इति.

सोऽयं तत्त्वसारनामा प्रबन्धः शारीरकशास्त्रान्तर्गतानां मुख्यतमानां केषां चिदधिकरणानां श्रीभाष्यानुसारेण विषय विमर्शनपूर्वकं तत्तदधिकरणसिद्धान्तनिर्धारणपरः, तद्विरुद्धानि मतान्तराणि च समूलघातं निघ्नन्, शब्दानां सौष्ठवेन, अर्थानां गांभीर्येण, अनितरसाधारणेन शैलीविशेषेण, ललितपदगुंभनचातुर्येण च एवमादिना अपरापरेण गुणजातेन गहनतराणामपि तत्तदर्थानां पुरतस्समुपस्थापनमिव कुर्वन् श्रोतॄणां कर्णविवरेषु अमृतधारामासिंचतीवेति नास्माभिर्विशिष्य वक्तव्यम्.

तदिदं प्रबंधरत्नं उभयवेदांतप्रवर्तनसभाध्यक्षैः मध्यभागीयवेदांतशाखायाः पंचमवर्षपरीक्षायां पाठ्यग्रंथत्वेन निरणायि. अस्य ग्रंथस्य मूलमात्रं चत्वारिंशद्वत्सरेभ्योऽर्वाक् कैरविणीक्षेत्रे कृतनिवासेन दिवंगतेन सुगृहीतनाम्ना योगिपार्थसारथिमहाशयेन सरस्वतीभण्डारमुद्रणालये मुद्रापितम्. तानि मुद्रितपुस्तकानि मुद्रापयित्रा सह स्वयमपि कीर्तिशेषाण्येवेदानीं संजातानि, न पुनः कस्यापि दृष्टिपथे समवतरंति.

यद्यपि श्रीरंगनगरनिवासिना नडादूर् सुंदराचार्येण वि
च्चितया सारास्वादिनीसमाख्यया व्याख्यया सह विह्लूर्-न-अ
वेंकटशेषाचार्येण कुंभघोणनगरस्थे वैदिकवर्धिनीयंत्राल
मुद्रापितं पुस्तकं समुपलभ्यते. अथापि दक्षिणदेशमात्रलब्
प्रचारैः ग्रंथाक्षरैरेव तत्रास्य मुद्रिततया न तेन सर्वेषामु
कारस्सेत्स्यतीति मत्वा देवनागरलिप्या मूलमात्रस्य पुनर्मुद्र
मस्माभिः ग्रंथदौर्लभ्यपरिजिहीर्षावशंवदैः मातृकाकोशत्रय
धारेण समारब्धम्.

तत्रैकं पुस्तकं रामानुजपुराग्रहारे कृतनिवासस्य दिवं
तस्य श्रीपाटरार्यस्य कोशसंग्रहात् लब्धं सार्धशतवर्षदेशी
तालपत्रमयं ग्रंथाक्षरलिखितं विशेषतश्शुद्धम्.

द्वितीयं श्रीयदुगिरियतिराजसंपत्कुमारयतिवर्यैर्वर्तमाने
पूर्वाश्रमे आंध्रलिप्या लिखितं कागदमयं पंचचत्वारिंशद्व
देशीयं नातिशुद्धम्.

तृतीयं तु पूर्वनिर्दिष्टं कुंभघोणे मुद्रितं प्रायश्शुद्धं द्वा
शद्वर्षदेशीयम्. एषु च त्रिषु पुस्तकेषु ग्रंथस्य उपांत्यं प
कृत्स्नशारीरकार्थसंग्रहरूपं द्वितीयतृतीयपुस्तकयोः नो
लभ्यते.

तदेवं पुस्तकत्रयाधारेण समारब्धमुद्रणस्यास्य ग्रंथस
संशोधने साहाय्यं कृतवतां देवशिखामणिरामानुजाचार्या
उपकारः चिरस्मरणीयोस्माकम्.

अत्र च मुद्रणे हकारवकारयोः संयोगस्थलेषु एतन्मुद्रणालये तथाविधसीसकाक्षरासांनिध्यवशात् व्यत्ययेन वकारहकारयोः संयोग एव स्वीकर्तव्यस्समापतित इति तमिमं व्यतिक्रमं मर्षयंतु विचक्षणा इति निवेदयति.

विदुषामनुचरः

२०—३—१९३२ रा॥ नरसिह्माचार्यः,

मल्लेश्वरम् बेंगलूर्. उभयवेदान्तप्रवर्तनसभाकार्यदर्शी.

श्रीरस्तु

श्रीमते रामानुजाय नमः

श्रीवत्सकुलतिलकैः वरदाचार्यैः समनुगृहीतः

तत्त्वसारः

रम्यजामातृरूपेण योऽवतीर्णो यतीशिता ।
विना तस्य पदाब्जाते न मेऽस्ति शरणं क्वचित् ॥
वंदेऽहं वरदार्यं तं वत्साभिजनभूषणम् ।
भाष्यामृतप्रदानाद्यः संजीवयति मामपि ॥

(मंगलाचरणम्)

श्रीविष्णुचित्तपदपंकजसंगमाय
चेतो मम स्पृहयते किमतः परेण ।
नो चेन्ममापि यतिशेखरभारतीनां
भावः कथं भवितुमर्हति वाग्विधेयः ॥१॥

(स्वाहंकारखण्डनम्)

क्व पथि विदुषामेषा प्रौढिः श्रियःप्रभुणा शपे
मशकशकनं मन्ये माद्दक्प्रभावनिदर्शनम् ।
यतिवरवचस्तेजः प्रत्यार्थिवर्गनिरर्गल
क्षपणनिपुणं नित्यं जागर्ति कीर्तिकरं मयि ॥२॥

न खलु कवितामानः का नः क्षतिः पथि गौतमे
न च परिचयः काणादे वा कुमारिलदर्शने ।
अपि गुरुमते शास्त्रेष्वन्येष्वपीह तथापि नः
फलति विजयं सर्वत्र श्रीयतीश्वरगीःश्रमः ॥३॥

यः करोति यतिराजभारतीचित्तवृत्तिषु चिरं परिश्रमम् ।
तस्य वैदिकसदश्शिखामणेरग्रतः क्व परवादिसंभवः ॥४॥

(जिज्ञासाधिकरणपूर्वपक्षः)

अन्यत्र व्यवहारतो न भवति व्युत्पत्तिरन्यत्र वा
कश्चित्कार्यधियं कथं व्यवहरेदित्थं च निश्चीयते ।
शब्दाः कार्यपरा इति श्रुतिरतस्तत्रैव मानं पुनः
प्रामाण्यं कथमश्नुवीत परिनिष्पन्ने परे ब्रह्मणि ॥५॥

(अत्रोत्तरं सिद्धे व्युत्पत्तिसमर्थनम्)

यः प्राबोधि परैरिहापवरके दण्डः स्थितो बोध्यतां
चैत्रायेति स तस्य बोधनसमुद्युक्तो यदूचे वचः ।
एतच्चेष्टितभेदवित्तदितरो मूको यथाऽऽकर्णयन्
बालः खल्विदमस्य बोधकमिति व्युत्पत्तिमभ्यस्यति ॥६॥

अंगुल्या निर्दिशद्भिर्घटमुखमखिलं वस्तु तत्र ब्रुवद्भि
स्तच्छब्दांस्तद्विभक्तीरपि च तदुचिते गोचरे पूर्ववृद्धैः ।
पित्राद्यैः शिक्ष्यमाणाः शिशव इह मुहुस्स्वात्मनां तत्तदर्थ
ज्ञानं तच्छब्दमात्रश्रवणत उदितं प्रेक्ष्य जानंति शक्तिम् ॥

(अथ जन्माद्यधिकरणे)

भूतानीति पदेन वस्त्ववगतौ सत्यामिमानीति य
द्रायंत्यामखिलेश्वरं गिरि जगज्जन्मादिभिर्लक्षणैः ।
तेनादर्शि विचित्रतैव जगतस्स्रुज्यस्य तेनापि त
त्स्रष्टुर्ब्रह्मण उज्ज्वला गुणगणा जिज्ञास्यताहेतवः ॥८॥

(अचिन्त्येत्यादिभाष्यार्थः)

अस्येत्युद्दिश्य सौत्रं पदमथ तदचिन्त्यादिभाष्यं विवव्रे
तत्तन्मानप्रसिद्धं जगदभिदधती तद्विचित्रत्वमाह ।
श्रौती सौत्रीदमुक्तिस्त्विति हृदि निदधत्तत्र चाचेतनानां
वैचित्रीमाह पूर्वं पदमथ नियतेत्यादिकं चेतनानाम् ॥९॥

(अथ शास्त्रयोनित्वाधिकरणे)

कार्यत्वाद्घटवत्सकर्तृ विमतं क्षित्यादि कार्यं च त
त्सर्वं सावयवत्वतः स भगवानाधारसिद्धान्ततः ।
इत्येतन्न घटेत विश्वजनने यत्कर्तृकालैक्ययोः
कार्यत्वं व्यभिचारि भेदगणनाद्धेतोर्विशेषोऽथवा ॥१०॥

(आनुमानिकेश्वरवादे कर्त्रैकत्वासिद्धिः)

यत्कल्पनालघिमलालसमानसानां
कर्त्रैक्यसिध्दिरिति नादरणीयमेतत् ।
तद्व्याप्तिमेव हि रुणद्धि, सकर्तृकत्वं
किं कल्प्यते लघिमसंपदमीप्समानैः ॥११॥

(किंबहुना-ईश्वरस्यैवासिद्धिः)

क्ष्मादावंशिनि कारणांतरगणे यत्नेऽप्यदृष्टे तनौ
पक्षे दृष्टविरूपताऽस्त्वपरथा कल्प्या न कर्तर्यपि ।
सेयं न्यायपथप्रहीणयुगपत्सर्गक्षयौ नेक्षितौ
सर्वस्यैव न कल्पना परिकरस्तन्नानुमेयः परः ॥१२॥

(संक्षिप्योक्तस्य विस्तरः)

नित्यं क्षित्यादि सांशं भवदपि घटतां कारणानां परेषां
व्यापारः कर्त्रपेक्षाविधुर इह भवत्वस्य कर्तुः प्रयत्ने ।
नापेक्ष्ये धीचिकीर्षे तनुभृत इह चादृष्टमीष्टे विधातुं
कार्यं देही दवीयानपि सृजतु जगद्धर्ष्म दृश्येतरद्वा ॥१३।

दृष्टानुगुण्यविरहादिह कल्पनाना-
मासामसिद्धिरिति चेदपि कर्तरि स्यात् ।
जन्म क्रमेण ददृशे जगतः क्षयोऽपि
कॢप्तिश्च दर्शनवशादनयोस्तथा स्यात् ॥१४॥

(समन्वयाधिकरणे)

धिक्कौमारिलदर्शनव्यसनिनः प्राभाकरप्रक्रिया-
विक्रांतानपि हंत नाथविधुरं विश्वं जगज्जल्पतः ।
दूरे कारणदोषबाधकधियौ नाथे पुमर्थे स्वतः-
प्रामाण्यं न कथं भजंति विधिवन्मन्त्रार्थवादोक्तयः ॥

(ईक्षत्यधिकरणे आदेशशब्दार्थः)

ान्दोग्ये केचिदाहुर्दिशतिरुततमादेशमप्राक्ष्य इत्य-
ाङ्पूर्वस्तूपदेशं प्रकटयति सतो न प्रशास्तिं घञन्तः।
ो कर्तर्यस्ति कर्मण्यगणि घञिह सत्कर्तृ शास्तौ न कर्म
यात्स्यात्कर्मोपदेशे तदिदमुदितमादेशवाचोपदेश्यम् ॥१६॥

(अत्रोत्तरम्)

त्र ब्रूमः प्रशास्तिं वदति दिशिरसावाङ्मुखो नोपदेशं
ास्तौ सोऽतिप्रसिद्धो न हि पर इह चापेक्षितार्थप्रसंगः।
ुक्तोऽसाधारणोक्त्या घञगणि करणेऽप्यत्र वैवक्षिकत्वं
ाब्दोक्तं कारकाणां ननु करणतया कर्तरि स्याद्विवक्षा ॥१७॥

(आनंदमयाधिकरणे पुच्छब्रह्मवादपूर्वपक्षः)

षष्ठ्यान्यत्वमवेदि नैनमवदत्श्लोको न चाज्ञातता
ज्ञातस्यास्य तथापि नावयविता तस्यान्य आत्मा श्रुतः॥
शोध्यत्वं च विकारवाचकवचस्तद्ब्रह्म पुच्छं भवे
त्त्वानन्दमयस्स चान्नमयवत्कोशो बहिः कथ्यते ॥१८॥

(तन्निराकरणम्)

लिंगान्तप्रधानप्रकृतपरवचोरूपणं चाप्यनन्यैः
ोकाः पुच्छं न चाहुः स्वरसमपि च नस्सूत्रमन्योऽन्तरो न॥
ष्ठ्यादिश्चांशभावान्निरवधिकतया रूपणादानुरूप्यात्
र्यायत्वादनन्यात्मकवचनतया पुच्छहेतुः परास्तः ॥१९॥

(अन्तरधिकरणे कप्यासश्रुत्यर्थनिरूपणम्)

कपिस्त्वादित्यः कं पिबति किरणैरित्यपि कपि
र्वंभस्तीत्याम्नातस्स कपिरमुनाऽस्तं यदिह तत्।
प्रतीमः कप्यासं दिवसकरतेजोविकसितं
सुपद्मं श्रीमत्त्वादगणि भगवच्चक्षुरुपमा ॥२०॥

नाळं कपिर्भवति कं पिबतीति तस्मिन्
कप्यास आसनमुशन्ति मनीषिणस्तत्।
कप्याससुज्ज्वलमुदारमिदं सरोजं
चक्षुर्निदर्शनमुदीरितमीश्वरस्य ॥२१॥

कमुदकमिह प्यासो यस्यासनं यदिवोद्भवः
कविभिरुदितं कप्यासं तद्गभीरजलोदयात्।
शिशिरमधुरं श्रीमद्दामोदराक्षिनिदर्शनं
भवति नळिनं लुप्ताकारस्त्वपिः पिहितादिवत् ॥२२॥

कप्यासं भानुबिंबं हरिभजनपदं हृत्सरोजं च यद्वत्
तद्वच्चोपासकाक्षिद्वयमिति तु न सत्तत्र यत्पुण्डरीकम्।
गौणं तस्याक्षिणी इत्युभयपदनिराकांक्षतानादरेणा
प्यध्याहारस्समानाधिकृतपदगतिर्व्यक्तिरूर्ध्वं तदुक्तिः ॥२३॥

कश्चिज्जल्पति मर्कटस्य जघनं कप्यासमक्ष्णोरयं
दृष्टान्तः कथमिष्यते भगवतः सत्येव गत्यन्तरे।
सामानाधिकरण्यमत्र पदयोः प्राप्तं कुतस्त्यज्यते
पद्मं चेद्विशिनष्टि तत्सदृशि तच्छब्दस्तु गौणस्तव ॥२४॥

दरविकसितं कश्चित्कप्यासमाह गतिस्त्वियं
भवतु भगवच्चक्षुर्दृष्टांतपंकजसंगता ।
तदपि च न सत्तस्मिन्नर्थे यतो न तु कुत्रचित्
तदवयवशास्संहत्या वा पदं व्युदपाद्यत ॥२५॥

षट्स्वर्थेषु समीरितेषु चतुराः कप्यासवाचस्त्रयो
गंभीरांभ इति प्रकृत्य भगवद्रामानुजांगीकृताः ।
तत्स्वीकारबहिष्कृतास्तदितरे हेयास्त्रयस्तद्विदा
श्लोकैष्षड्भिरमीभिरित्थमुदितस्सोऽयं विभागो मया ॥२६॥

(ज्योतिरधिकरणे)

गायत्री नाम सामश्रुतिशिरसि परं ज्योतिरध्यायि सिध्य-
च्चातुष्पद्यं तु भूतक्षितितनुहृदयैः षड्विधं तद्विधाभिः ।
गानत्राणादिकाभिः श्रुतिगतवचनव्यक्तिभेदात्तु सिद्धा
वाक्प्राणोक्तिः परार्था स्वरसनिगमनश्रुत्यधीनं तदेतत् ॥२७॥

(अन्तर्याम्यधिकरणे)

तमो नाम द्रव्यं बहळविरळं मेचकचलं
प्रतीतं केनापि क्वचिदपि न बाधश्च ददृशे ।
अतः कल्प्यो हेतुः प्रमितिरपि शाब्दी विजयते
निरालोकं चक्षुः प्रथयति हि तद्दर्शनवशात् ॥२८॥

(भूमाधिकरणे)

भूमाख्यः पुरुषोत्तमो यदधिकं ब्रह्मेहि सत्याह्वयं
प्राणाख्यादवरात्मनस्तु बलतस्तज्ज्ञाधिकस्सत्यवित् ।
यस्सत्यं वदतीति वाग्गमयितुं नह्यग्निहोत्र्यन्तरं
शक्नोति प्रकृताग्निहोत्र्यवगमाद्भंगस्तु शब्दश्रियः ॥२९॥

(दहराधिकरणे)

अस्वारस्यचतुष्टयं परमते यच्छब्दलिंगव्यथा
तस्मिन्नित्यनपेक्षया व्यवहिते हृत्पुण्डरीकेऽन्वयः ।
अप्याकांक्षितकामवेदनविधिक्षेपः स्वपक्षे द्वयं
यच्छब्दस्य यदैकशेष्यमपि या तत्रैकवद्भाविता ॥३०॥

(देवताधिकरणे)

पटुतरविग्रहादिकवतां भवतापवतां
भगवदुपासनं दिविषदामपि संभवति ।
ननु शतमर्थवादवचसामपि मंत्रगिरां
विधिवदिह प्रमाणमपदोषमपुंप्रभवम् ॥३१॥

स्तुतिपरमाद्यमत्र निजसाध्यविधेयरुचि
प्रजननसिद्धये स्ववचनीयगुणादरवत् ।
तदितरथा न सिध्यति विधिष्विव तत्त्वविदां
कथमसता गुणेन कथितेन नुतिर्भवति ॥३२॥

अथ मनवो विधेयपरिबोधनकार्यमुखा-
द्विधिमुपकुर्वते हि दिविषद्वपुरादिधियम् ।
उपजनयन्त एनमुपकर्तुमलं खलु ते
कथमिव देवता धियमुपैति वपुर्विधुरा ॥३३॥

अथ सुरनरतिर्यक्स्थावरात्मप्रपंच
प्रजननगणनासु छन्दसामन्तभागे ।
प्रकटतरमधीता विग्रहा देवताना
मवकलय गतिं चोपासनप्रक्रियासु ॥३४॥

निगमशतनिदानैर्देवताविग्रहादि
स्फुटतरमितिहासैर्धर्मशास्त्रैः पुराणैः ।
अपि गदितमनन्तोपासने साधिकार
स्तदयममरवर्गस्तत्फलार्थी समर्थः ॥३५॥

(तत्रैव समाननामरूपत्वादित्यत्र)

संस्थानं कलयाकृतिं त्वनुगतं तावत्प्रतीमो हि त-
द्भूमश्चापरमप्यदर्शि न तथा पक्षान्तरे जातिषु ।
यद्वद्गोत्वपुरस्सरीषु धिषणा बव्हीषु साधारणी
जातिर्जातिरितीदृशी फणितिरप्येवं मदीये पथि ॥३६॥

एका व्यक्तिषु भूयसीष्वनुगता पूर्णा प्रतिव्यक्ति या
संस्थानादपरा निरादिनिधना सा जातिरास्थीयताम् ।
गौर्गौरित्यनुवृत्तबुद्धिवचसी नो चेद्घटेते कथं
व्युत्पत्तिश्च कथं गवादिवचसां व्यक्तिष्वसंख्यासु नः ॥३७॥

अत्र ब्रूमः प्रतीमः किमपि किमपरं वस्तु सास्नादिमत्त्वा-
द्गोत्वं नामानुवृत्तव्यवहृतिविषयं तद्धि तादृक्षमैक्षि ।
गोत्वाजत्वाश्वतादिष्वनुगतमपरं वस्तु जातिष्वनेका-
स्वेकं जात्यादिशब्दव्यवहृतिघटकं जातिवादे किमूचे ॥३८॥

अन्यस्यादर्शनेन व्यवहृतिविषयस्यान्यथैवोपपत्त्या
कल्प्यत्वासंभवेनाप्युभयसमयसंगीतसंस्थावलंबी ।
युक्तो जात्यादिशब्दः सुसदृगिह मिथस्सा ह्यनुस्यूतधीवा-
ग्व्युत्पत्त्यहैव यादृक्परसमयमतामाकृतिं सा व्यनक्ति ॥३९॥

(आरंभणाधिकरणे)

अभावस्याभावो भवति खलु भावः परमते
घटादेरप्येवं कथय किमभावो न भवति ।
घटस्य प्रध्वंसो भवति हि कपालत्वमपर-
स्त्वभावः पिण्डत्वं किमिह ददृशे किंचिदपरम् ॥४०॥

संसर्गाभावमेवं विदुरिह सुधियो भावमेव त्वभावं
मन्वानाः कुंभवद्भूतलत इतरभूभागभेदस्त्वभावः ।
यस्तत्तत्कालभेदव्यतिकरितगृहप्रांगणादिप्रदेशः
कुंभाभावाश्रयोऽन्यैरगणि स इह नः क्वाधिकस्योपलंभः ॥४१॥

(तेजोऽधिकरणे)

सच्च त्यच्चेति सृष्ट्वा विशसि चिदचितौ तेन चोक्तोऽसि विश्वं
त्वज्जत्वात्त्वल्लयनत्वात्त्वसिति च निखिलं त्वच्छरीरं किलेति ।

तैस्तैश्शास्त्रैरभेदव्यवहृतिहृदयं विस्तृणानैर्निरस्ताः
भेदाभेदावभेदं भ्रममपि भगवन् कारणं कल्पयन्तः ॥४२॥

उन्नीतं गुरुणारुणाधिकरणे न ह्येकहायन्यगा
दारुण्यान्वयमाभिधानिकमपित्वाक्षेपतः प्रापितम् ।
यद्ब्रूतेऽरुणयेति केवलगुणं वाग्द्रव्यनिर्देशव
द्वाक्यस्था न गिरस्तु कारकविभक्त्यन्ता मिथस्संगताः ॥४३॥

अरुणाधिकरणसरणि-
स्समगणि रामानुजार्यमुनिभिर्या ।
उचितेयमनुचिताऽन्या
परिषदि विदुषां स्फुटीभवति ॥४४॥

उपात्तेऽपि द्रव्ये विसदृशविभक्तिव्यपगमात्
प्रकृत्या वैशिष्ट्यं परिणमति खल्वाकृतिनयात् ।
विभक्तिस्त्वर्थैक्यं प्रथयति समानैव पदयोः
त्रिरूपा सा संख्यान्वयमिव दिशेत्कारकधियम् ॥४५॥

(परायत्ताधिकरणे)

आदावीश्वरदत्तयैव पुरुषः स्वातंत्र्यशक्त्या स्वयं
तत्तज्ज्ञानचिकीर्षणप्रयतनान्युत्पादयन् वर्तते ।
तत्रोपेक्ष्य ततोऽनुमत्य विदधत्तन्निग्रहानुग्रहौ
तत्तत्कर्मफलं प्रयच्छति पुनः सर्वस्य पुंसो हरिः ॥४६॥

दुष्कर्मस्वनिवर्तनानुमनने पुंसः करोत्यच्युतः
स्वातंत्र्येण निरंकुशेन स गुणः श्रुत्या न दोषो हरेः ।

दृष्टश्चारिषु निग्रहो गुणतया लोके न दोषात्मना
न स्यादाश्रयसिद्धिरौपनिषदं नो चेत्प्रमाणं वचः ॥४७॥

दुष्कर्मव्यवसायतस्तु विरतो यस्तस्य पुंसः पुरा
भूयोजन्मसमार्जितान्यगणितान्यागांस्यनादृत्य यत् ।
तस्यानंतसुखाप्तये च यतते लक्ष्मीसहायः स्वयं
तत्कारुण्यपुरस्सरो गुणगणस्तस्यायमुज्जृंभते ॥४८॥

(अंशाधिकरणे)

आदौ भेदश्रुतीनामनृतविषयता लक्षणा चैक्यवाचां
दूरे तावत्प्रहाणं तदुभयघटनातत्पराणां च वाचाम् ।
प्रत्यक्षादिप्रमाणस्वरसगतिहतिस्तर्कबाधश्च भूयान्
मायावादे, तदेतत्सकलमितरथा लक्ष्मणाचार्यपक्षे ॥४९॥

न द्वैतं प्रतिपादयंत्युपनिषद्वाचः प्रसिद्धं हि तत्
किंत्वद्वैतमनन्यगोचरतया तद्वेद्यमास्थीयताम् ।
अप्राप्ते खलु शास्त्रमर्थवदिति व्यर्थः प्रयासो यतः
प्रख्यातादपरस्तु शास्त्रविषयो भेदस्त्वदद्वैतवत् ॥५०॥

यच्छ्वेताश्वतरश्रुतिर्नृबहुतामेको बहूनामिति
ब्रूते तत्र विधिर्विशिष्टविषयस्त्वष्टाकपालादिवत् ।
नित्यत्वात्मबहुत्वमत्र निगमादन्यत्र विघ्नः कथं
प्रत्यक्त्वेन पराक्तया स्वपरयोर्मुक्तौ च भेदः स्फुटः ॥५१॥

सामानाधिकरण्यभागिषु पदस्तोमेषु सर्वेषु किं
प्रत्याख्यं व्यतिरिच्यते प्रतिपदं वक्तव्यमद्वैतिना ।

यद्वा नेति न चेदनर्थकतया नैकातिरिक्तं पदं
पठ्येत प्रतिवादिनस्त्वितरथा युक्तिस्समासीदति ॥५२॥

दृश्यत्वादनृतं विगीतमिति यद्दृष्टांतयन्तो जगुः
शुक्त्यारोपितरूप्यमत्र कतिचित्तत्रेदमाचक्ष्महे ।
धर्मिग्राहकमानबाधितमिदं सोपाधिकत्वं पुनः
सौत्रं व्यक्तमभंगुरं व्यभिचरल्लिंगं च भंगाय वः ॥५३॥

मिथ्यात्वं भ्रांतिसिद्धं यदि खलु जगतः साध्यते सिद्धसाध्यो
हेतुस्सत्यः प्रपंचो भवति च यदि वा सत्यमद्वैतहानिः ।
साध्यं ब्रह्मस्वरूपं यदि भवति तदा सिद्धसाध्यत्वमेव
स्यादेवं च प्रपंचव्युदसनसरणिर्दूरतस्ते निरस्ता ॥५४॥

चिन्मात्रव्यतिरेकि वस्तु सकलं मिथ्येति जोघुष्यते
योगाचारमते यदौपनिषदीकर्तुं तदाकृष्यते ।
मायावादिभिरप्रतीतनिगमन्यायप्रमाणांतर-
प्रस्थानैरपहस्तयंति हि सह न्यायैः प्रमाणानि तत् ॥५५॥

नानात्वक्षणिकत्वयोरुपगतेरेकत्वनित्यत्वयो-
रप्येकत्र मते परत्र च धियो वैषम्यमस्तीतिचेत् ।
मायावादिमतस्य सौगतमतादेतन्न यत्तात्त्विको
धर्मस्तत्र मतद्वयेऽपि न धियः कश्चित्स्वरूपादृते ॥५६॥

स्वरूपानादित्वस्वपरघटने दुर्घटनता
प्रवाहानादित्वं पुनरिति चतस्रो हि गतयः ।

असत्याविद्याया गदितुमनवस्थापरिहतौ
मतास्त्वेतास्तुल्याः स्फुटमसदधिष्ठानसरणौ ॥५७॥

रेरे खण्डनकार खण्डय भवत्पक्षः प्रतिक्षिप्यते
तर्कैस्त्वत्कथितैस्ततः किमितिचेदस्मन्मतं तिष्ठति ।
यद्वन्माध्यमिकोक्तचिद्ध्रुदसनप्रत्यासतस्त्वन्मतं
तिष्ठत्येव यथा च बाधकहतौ लोके स्वरूपस्थितिः ॥५८॥

अचित्त्वं वेद्यत्वे प्रसजति धियः कुंभवदिति
स्वसिद्धिस्सा चित्त्वादिति यदिह कोऽप्याह तदसत् ।
स्वसिद्धिस्स्वाधारं प्रति हि न परं प्रत्यपि नरं
परज्ञेया सेयं तदपि न मतित्वं विघटते ॥

तथाहि प्रत्यक्षप्रभृतिमितिवर्गप्रकटितः
स्वभावो भावानामपसरति वेद्यास्त इति किम् ।
स्वभावव्यत्यासो यदि भवति वेद्यत्ववशतः
पटस्य ज्ञेयत्वे घटवदपटत्वं प्रसजति ॥६०॥

प्रकाशः कुंभादौ जडिमवति तद्गोचरमिति-
स्तिरोधिश्चैतस्या विरतिरजडे ब्रह्मणि पुनः ।
स्वरूपं चिन्मात्रस्फुरणमपिधिश्च स्वनिधनं
जडं वा ब्रह्म स्यादपिधिविधुरं वाऽप्यपरधा ॥६१॥

पुरोवर्तिद्रव्यस्फुरणमिह रूप्यभ्रमसहं
न शुक्तित्वस्फूर्तिर्भ्रमविहतये या प्रभवति ।

यदि ब्रह्म प्राग्वन्न खलु जगदध्यासविरतिः
क्व सिध्येदध्यासो यदि भवति शुक्तित्वसदृशम् ॥६२॥

इदं मायावादे विविधमुदितं दूषणमिह
स्वयंज्योतिर्ब्रह्म व्यपगतविशेषं यदि कथम् ।
मते तस्मिन्नस्मादृशि तु सविशेषः पुरुष इ-
त्यतद्रूपारोपस्तदुपरतिरित्यादि घटते ॥६३॥

अधिष्ठाने पुंसि स्वयमहमिति स्फूर्जति वपुः-
प्रकाराध्यारोपः पशुरहमहं मानुष इति ।
अणुत्वादौ देहव्यतिकरविदूरे च विहिते
तिरोधिस्संकोचो ननु भवति तद्बोधैरधियः ॥६४॥

अहंत्वज्ञातृत्वे ननु पुरुषधर्मौ न तु वपु-
र्गुणौ वस्तुस्थित्या तदपि न तथात्वं ननु तयोः ।
अनादेरध्यासादवगतमिदानीं श्रुतिनय-
स्वयोगाद्यैरन्यः स्फुरति वपुरादेस्तु पुरुषः ॥६५॥

जीवन्मुक्तिमतं न जीवति यतः शस्त्रेण शास्त्रात्मना
लूनं लोकविरुद्धसिद्धि च यतस्तेनेदमादावपि ।
आपस्तंबनिरस्तमौपनिषदप्रस्थानमातस्थुषा-
माचार्योऽपि निराचकार खलु तद्द्वैपायनाख्यो मुनिः ॥६६॥

क्व वेदान्ताः क्वामी निहितमतयः शंकरमते
वदन्तः प्रामाण्यं भ्रमविलसितं वेदवचसाम् ।

अहो यद्वद्बुद्धग्रथितफणितीनामथ च ते
कलिग्राहग्रस्तैरगणिषत वेदान्तिन इति ॥६७॥

(उभयलिंगाधिकरणे)

यत्सामान्यविशेषवर्त्मसु गुणव्यत्यासविध्यात्मसु
त्रय्यन्तेषु जनार्दनप्रणयिषु प्राबल्यदौर्बल्ययोः ।
प्रस्थानं प्रतिपेदिरे कतिचनापच्छेदनीतिच्छला-
न्मीमांसापदवीपरिश्रमकथादूरेषु तच्छोभते ॥६८॥

यद्ब्रह्मणो गुणविकारशरीरभेद
कर्मादिगोचरविधिप्रतिषेधवाचः ।
अन्योन्यभिन्नविषया न विरोधगन्ध
मर्हन्ति तन्न विधयः प्रतिषेधबाध्याः ॥६९॥

अग्नीषोमीयहिंसा निजविधिविहिता किं निषिद्धा न हिंस्या-
द्भूतानीत्येतयोक्त्या पशुपदविषयश्छाग एव न्यरूपि ।
छागो वा मंत्रवर्णादिति च तदुभयन्यायतो हेयधर्म
क्षेपार्था निर्गुणोक्तिः श्रुतशुभगुणके निर्मले ब्रह्मणि स्यात् ॥

(पराधिकरणे)

कस्त्वं, तत्त्वविदस्मि, वस्तु परमं किं तर्हि, विष्णुः, कथं,
तत्त्वेदंपरतैत्तिरीयकमुखत्रय्यन्तसंदर्शनात् ।
अन्यास्तर्हि गिरः कथं, गुणवशात्तत्राह रुद्रः कथं,
तद्दृष्ट्या, कथमुद्भवत्यवतरत्यन्यत्कथं, नीयताम् ॥७१॥

य उक्तो याज्ञिक्यामुपनिषदि निस्सीममहिमा
स उक्तः पुंसूक्ते परमपुरुषः कारणतया ।
पुनस्सौबालिक्यामुपनिषदि माहोपनिषदी
गतिश्चैवं तद्वत्कलय कठवल्लीप्रभृतयः ॥७२॥

व्याजह्रे जगदेककारणतया साक्षात्तमेको ह वा
इत्यारंभवता महोपनिषदुद्घोषेण नारायणः ।
ब्रह्मेशाद्युवसुन्धरोडुसलिलस्वाहेशसोमांशुम-
त्पूर्वाशेषजगद्विनाशवति यः काले समुन्मीलति ॥७३॥

अप्राप्तत्वान्महत्यामुपनिषदि जगत्कारणत्वानुवादो
न स्यादेको ह वा इत्ययमुपरि हि देवेभ्य इत्यादिनीया ।
वाक्यस्वारस्यतो हि व्यगणि भगवतः कारणत्वं परेषां
कार्यत्वं चाविरुद्धं तदपि न परमस्त्यत्र किंचिद्विधेयम् ॥७४॥

यत्संज्ञामूर्तिकर्तुः परमपुरुषतः किंचिदाकाशनाम्नो
हृत्पद्मे स्यादुपास्यं श्रुतिशिरसि परं सामगानामगायि ।
तत्र प्रश्नोत्तराभ्यामघविहतिमुखान्सत्यसंकल्पतांता-
नष्टौ शिष्टांस्तदीयाननिदमुदयिनस्तद्गुणानुद्गृणन्ति ॥७५॥

प्रस्तुत्यामृतहेतुमादिपुरुषं न्यक्कृत्य मार्गान्तरं
तस्यैतद्घटनाय निष्प्रतिभटामुद्घुष्य सार्वेश्वरीम् ।
उक्तिस्तत्र ततो यदुत्तरतरं तन्मुक्तिदायीति या
तच्छ्वेताश्वतरागमे निगमनं प्रोक्तस्य हेतूक्तिमत् ॥७६॥

यच्छ्वेताश्वतरागमो भगवति स्पष्टप्रयोगान्तरं
तस्मिन्निर्दिशति ध्रुवं शिवपदं प्रक्रान्तमुक्तिप्रदे ।
सर्वव्यापिनि सर्वतोमुखशिरोग्रीवे स एव प्रभु-
स्सत्त्वस्यैष महान् प्रवर्तक इति व्यक्तः परः पूरुषः ॥७७॥

यच्छ्वेताश्वतरश्रुतिशिवपदं वक्ति प्रयुक्तं हरा-
वग्रे जाग्रति विश्वकारणपरं तत्रैव युक्तं हि तत् ।
साधारण्यविदूरविष्णुभगवन्नारायणाद्याह्वयै-
राहुः कारणमेनमौपनिषदा भागास्तदाकांक्षिणः ॥७८॥

यदग्रे जागर्ति श्रुतशिवपदं ब्रह्म परमं
जगद्धेतुः श्वेताश्वतरनिगमान्ते स भगवान् ।
प्रयुक्तो यस्तस्मिन् यजुषि शिवशब्दः श्रुतिशिर-
स्स्वतस्साधारण्यं न समगणि नारायणगिरः ॥७९॥

यद्देवैरनुयुक्त उत्तरमुशन् रुद्रो विवृत्यात्मनि
व्याजह्रे महतीमधीश्वरधुरामाथर्वणे मूर्धनि ।
स प्रादुर्भवदन्तरात्मभगवद्भूमाऽभणत्सोन्तरा-
दन्तः प्राविशदित्यधीतविधया तद्वामदेवादिवत् ॥८०॥

नान्यः कश्चिन्मत्त इत्युग्रवाक्या-
दूर्ध्वं नेतिस्तत्समाप्तिं ब्रवीति ।
प्राग्वत्पश्चादुग्रवाक्यानुवृत्तेः
सोऽहं नित्योऽनित्य इत्यादिभंग्या ॥८१॥

सोऽतो हेतुं वक्ति यद्वा प्रकारं
प्रह्लादोक्तो हेतुरन्तःप्रवेशः ।
प्रह्लादोक्तिस्सर्वगत्वादनन्त-
स्येति व्यक्ता वैष्णवाख्ये पुराणे ॥८२॥

अथवेतिपदेन हेतुरत्र
व्यतिरेकोऽगणि नान्य इत्यधीतः ।
अहमेक इतीरितान्वयस्य
प्रतिपत्तुं सुकरः प्रकारपक्षः ॥८३॥

रुद्रस्योक्तिस्सोऽन्तरादित्यतोऽसौ
तस्मादन्यः कोऽपि तस्यान्तरात्मा ।
अन्येषां चेत्युच्यते सोऽन्तरादि-
त्युक्त्या रौद्र्या सोऽपि विष्णुः प्रसिद्धः ॥८४॥

इत्युक्तिर्वा समाप्तिं वदतु हरगिरस्सोऽन्तरादित्यतोऽसौ
मा भूद्रुद्रोक्तिरित्थं सति न विघटना किंचिदस्मन्मतस्य ।
रुद्रः स्वात्मात्मभूतं हरिममलधिया स प्रविष्टश्चिकीर्षु-
र्मेधावीव स्ववश्यं नरमपरमिति व्यज्यते वेदवाचा ॥८५॥

श्रुत्वा रुद्रवचस्तदीयमहिमस्तोत्राय लब्धोद्यमा-
स्सर्वैश्वर्यमथर्वमूर्ध्नि यदपि व्याजह्रुरस्यामराः ।
अन्तर्यामिसमाधिहेतव इह व्यक्ता हि रुद्रोक्तय-
स्तद्युक्तास्तदनूक्तयस्तु दिविषद्वाकास्तदेकाशयाः ॥८६॥

ओंकारपूर्वकतया प्रतिपादितानि
नामान्तराणि ननु रुद्रपुरस्सराणि ।
आथर्वणे शिरसि तानि तु न प्रसिद्ध
रुद्रेशितृत्वमुपपादयितुं क्षमन्ते ॥८७॥

समाख्याः प्रक्रांतप्रणवविषयिभ्यः प्रतिपदं
निरुक्ता रुद्राद्या यदपि हि महादेवशिरसः ।
श्रुतेराथर्वण्याश्शिरसि तदिदं तारविभवं
व्यनक्त्योंकारस्स्यादुपरितनविद्यापरिकरः ॥८८॥

पन्थानं बन्धशान्तेः पशुपतिभजनं निर्वहाथर्वमूर्ध्नि
प्रोक्तः प्राच्या तदुक्त्या स्फुरति हरिरिहोपासनीयस्तदात्मा ।
यद्वन्मध्वादिविद्यास्वितरसुरतनुस्स्रष्टृसृज्यादिभावः
श्रौतस्त्वत्रापि तुल्यः श्रुतमिह भसितं प्रस्तुतोपास्तिशेषः ॥

प्रस्तुत्य रुद्रवपुषः पुरुषोत्तमस्य
विद्यामथर्वशिरसीरितमंगमस्याः ।
भस्म प्रसक्तिरितरत्र न तस्य यद्व-
त्सौत्रामणीप्रकरणोक्तसुराग्रहस्य ॥९०॥

आथर्वण्यां शिखायामगणि भगवतो या जनिः कारणैक
ध्येयत्वेदंपरायां जगदुपकृतये सोऽयमिच्छावतारः ।
यद्विष्णोः कारणैकप्रवणफणितिभिः कारणत्वोपदेशः
स्पष्टो दृष्टप्रयोगस्सुखजनकतया शंभुशब्दोऽपि तस्मिन् ॥९१॥

उदितमुपासनद्वयमथर्वशिरश्शिखयोः
स्फुटमपुनर्भवाय पुरवैरिकळेबरिणः ।
कमलदृशः क्वचित्कवचन कारणतत्त्वपर
श्रुतिविहितस्य हार्दसुषिमध्यजुषां विदुषाम् ॥९२॥

उक्तं केनचिदीश्वरः पुरुष इत्युक्ती शिवश्रीशयो
र्वर्तेते बहुशो महत्परमवाग्युक्ते वियुक्ते अपि ।
इत्युत्कर्षनिकर्षगोचरपदव्याख्यातयोरेतयो
रुत्कर्षो गिरिशस्य वक्तुमुचितः पुंसः प्रधानादिवत् ॥९३॥

नैतत्साधु समाख्यया हि बलवद्वाक्यादिभग्नार्थया
नोत्कर्षो गिरिशस्य वक्तुमुचितः केनापि देवेन्द्रवत् ।
इंद्रस्स्यात्परमेश्वरस्त्वितरथा तत्तत्समाख्यावशा-
दाख्या हि प्रबलप्रमाणविहता तस्मिन् महावृक्षवत् ॥९४॥

किं जीवः पुरुषोक्तिगोचर इति श्रीशोऽपि तद्गोचरो
जीवस्स्याद्गिरिशो ध्रुवो भवति किं तौ स्थाणुसंज्ञाविति ।
तक्षत्वाय घटेत किं मुखभुवामाचार्यसंशब्दनं
मंडूकत्वमुपैति किं हरिपदस्पर्शेन कण्ठीरवः ॥९५॥

प्राणाकाशमुखैः पदैरुपनिषद्भागेषु जोघुष्यते
किं न ब्रह्म परं परत्वगणना जागर्ति किं तावता ।

प्राणाद्येषु शिवादिशब्दगदितं तच्चेत्परत्वं कुतः
तत्तत्कारणवाक्यसिद्धभगवत्सृज्येषु रुद्रादिषु ॥९६॥

यदुपनिषद्भिरप्रथि परिब्रढिमा परमः
कमलदृशो विशुद्धनयलब्धपरिष्कृतिभिः ।
इतरगिरोऽनुरोद्धुमिदमेव घटन्त इति
स्फुटमुपबृह्मयंति मुनयोऽपि मनुप्रमुखाः ॥९७॥

(पुरुषार्थाधिकरणे)

ऐदंपर्यमपौरुषेयवचसामर्थेषु नैसर्गिकं
साक्षादक्षरराशिपर्यवसितः स्वाध्यायविध्याशयः ।
व्याहंतीति वदंति ये जपविधिन्यायेन संतुष्यता
मायुष्मद्भिरनन्यलभ्यविषये शब्दस्समुज्जृंभते ॥९८॥

यस्स्वार्थेष्वनिदंपराः श्रुतिगिरः स्वाध्यायविध्याशया-
दाचष्टे स विकल्पमर्हति विधिः सार्थः किमास्थीयताम् ।
यद्वानर्थक इत्यनेन वचसा तुल्यत्वमासां गिरा-
माद्ये स्यादितरत्र तत्प्रतिभटः कस्मादकस्माद्विधिः ॥९९॥

यच्छ्रोतुर्गृहमेधिनो गुरुगृहे काष्ठोदकाद्याहृति-
व्यासक्तस्य न संभवत्यवसरस्तत्तत्स्वकर्मक्रमे ।
स्याच्चेद्गुर्वनुवर्तनाद्यनुगुणः कुत्रावकाशो भवे-
दित्युक्तं कतिभिश्च तत्र कुशलैरित्थं समाधीयते ॥१००॥

यद्वेदाक्षरराशिसिद्ध्युपरतः स्वाध्यायविध्याशयः
तत्तन्मूलकशिष्यकृत्यविरतेर्लब्धावकाशाः क्रियाः ।
श्रोतुश्श्रावयितुर्यथेत्यवसरश्श्रोतुश्च सिध्येदतः
स्नेहेन स्पृहया च वित्तयशसोः शिष्यं गुरुः श्रावयेत् ॥१०१॥

(आतिवाहिकाधिकरणे)

अर्चिरहस्सितपक्षानुदगयनाब्दमरुदर्केन्दून् ।
अपि वैद्युतवरुणेन्द्रप्रजापतीनातिवाहिकानाहुः ॥१०२॥

(अन्तिमाधिकरणे)

शेषत्वं ननु दुःखमीक्षितमतो मुक्तेषु युक्तं न त-
न्मैवं माधवदास्यमौपनिषदं जागर्ति भूयः प्रियम् ।
धर्मिग्राहकमानधीक्षतमतस्तद्दुःखतासाधनं
यद्वा तद्व्यतिरिक्तदास्यमसुखं साध्येत सिद्धं हि तत् ॥१०३॥

(कृत्स्नशारीरकार्थसंग्रहः)

सद्ब्रह्मात्मादिशब्दैरभिहितमजडं छागपश्वादिनीत्या
तत्त्वं नारायणाख्यं निरधिकमसमं सेव्यमेकं मुमुक्षोः ।
आरभ्यैको हवा इत्युपनिषदि महत्यां यतो जायते चे-
त्यंतान्नारायणस्योपनिषदि विधिपूर्वात्मस्रष्टृत्वबोधः ॥१०४॥

वरदाव्हयमंडनो मनीषी
यतिबृन्दारकभागिनेयपौत्रः ।
निगमांतपयोधिकर्णधारो
विदधे विश्वहिताय तत्त्वसारम् ॥१०५॥

इति श्रीवत्सकुलतिलकवरदराजसूरिविरचितं
तत्त्वसाराख्यं वेदांतप्रकरणं समाप्तम्.

श्रीमते रामानुजाय नमः

श्रीः